# sUryastutiH

# सूर्यस्तुतिः

## Document Information

Text title : sUryastutiH 1

File name : sUryastutiH.itx

Category : navagraha

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : BhaktivivekasAra

Latest update : November 18, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# सूर्यस्तुतिः

ॐ नम आदित्याय ॥

श्रीभैरवी -
भगवन्देवदेवेश भक्तानुग्रहकारक ।
देहास्वास्थ्यं परं दुःखं भवेदिति न संशयः ॥ १॥

रोगैर्जीर्णो यदा देहस्तदा कं दैवतं श्रयेत् ।
यं स्तुत्वा स्वास्थ्यमाप्नोति तदुपासनमादिश ॥ २॥

श्रीभैरवः -
शृणु देवि प्रवक्ष्यामि लोकानुग्रहकाम्यया ।
रोगाजगरग्रस्तानां जन्तूनां पापचेतसाम् ॥ ३॥

स्मरणं धारणं चैव सूर्यस्यार्चनमेव च ।
ज्वरातिसाररोगानां नाशनं स्मरणादपि ॥ ४॥

कुष्ठविचर्चिकादद्रूसन्निपातादि नाशनम् ।
सूक्ष्मातिसूक्ष्मं यत्तेजो तं देवं शरणं श्रये ॥ ५॥

वारयेद्विघ्नराशींश्च तमांसि च मुहुर्मुहुः ।
अन्तर्वातौघध्वंसी यस्तं देवं शरणं श्रये ॥ ६॥

आकाशरूपो विश्वात्मा देवःप्रमकटितः प्रभुः ।
द्योतनात्त्रिषु लोकेषु तं दैवं शरणं श्रये ॥ ७॥

ध्यायनात्सर्वलोकेषु चिन्तनादपराजितम् ।
बुद्ध्यात्सर्वसमायुक्तं तं देवं शरणं श्रये ॥ ८॥

धीप्रेरकं तु यत्तेजः सर्वव्यापकमव्ययम् ।
बुद्धेः पारङ्गतं यत्तच्छरण्यं शरणं श्रये ॥ ९॥

यत्तदादिशते बुद्धिर्भर्गः सदसदात्मकम् ।

आर्तो भक्त्या च परमं शरणं तं व्रजाम्यहम् ॥ १०॥

रक्तपुष्पसमायुक्तं गृहीत्वोद्यन्तमर्चयेत् ।
प्रतिश्लोकमर्घपुष्पं दत्त्वा प्राञ्जलिकं स्थितम् ॥ ११॥

सर्वे रोगाः प्रणश्यन्ति लूता विस्फोटकादयः ।
भगन्दरशिरोरोगमूत्ररोगाश्मरीयुताः ॥ १२॥

श्वेतकुष्ठाद्यतीसारपायुकुक्षिसमुद्भवाः ।
त्वग्रोगा ये क्षुद्ररोगा ये त्वन्ये च महेश्वरि ॥ १३॥

ते सर्वे सम्प्रणश्यन्ति स्तोत्रस्यास्यानुकीर्तनात् ।
आपन्न आपदो मुच्येद्बद्धो मुच्येत बन्धनात् ॥ १४॥

अपुत्रः पुत्रमाप्नोति कन्या विन्दति सत्पतिम् ।
भीतो भयात्प्रमुच्येत चेत्याज्ञा पारमेश्वरी ॥ १५॥

इदं रहस्यं परमं नाख्येयं यस्य कस्यचित् ।
गुह्यं गुह्यतमं लोके वेदतन्त्रसमुत्थितम् ॥ १६॥

सर्वतः सारमुद्धृत्यतवस्नेहात्प्रकाशितम् ।
नातः परतरं स्तोत्रं सूर्यस्याराधनं परम् ॥ १७॥

अत्र पूज्यो रविर्देवि स्तोत्रेणानेन भक्तितः ।
सायं प्रातर्नमस्कृत्य नान्नमद्याज्जलं पिबेत् ॥ १८॥

वर्षेणैव भवेत्सिद्धिरिति सत्यं वरानने ।
बद्धपद्मासनो देवः प्रसन्नो भक्तवत्सलः ॥ १९॥

सप्ताश्वः सप्तजिह्वश्च द्विभुजः पातु नो रविः ।
अकृतानि च पुष्पाणि सलिलारुणचन्दनैः ॥ २०॥

अर्घ्यं दत्त्वा प्रयत्नेन सूर्यनामानि कीर्तयेत् ।
नमस्ते विश्वरूपाय नमस्ते ब्रह्मरूपिणे ॥ २१॥

सहस्ररश्मये नित्यं नमस्ते सर्वतेजसे ।
नमस्ते रुद्रवपुषे नमस्ते भक्तवत्सल ॥ २२॥

पद्मनाम नमस्तेऽस्तु कुण्डलाङ्गदशोभित ।
नमस्ते सर्वलोकेश जगत्सर्वं प्रबोधसे ॥ २३॥

सुकृतं दुष्कृतं चैव सर्वं पश्यसि सर्वग ।
सत्यदेव नमस्तेऽस्तु प्रसीद मम भास्कर ॥ २४॥

दिवाकर नमस्तेऽस्तु प्रभाकर नमोऽस्तु ते ।
आश्रमस्थस्ततः पूजाप्रतिमां चापि पूजयेत् ॥ २५॥

उदयंस्तु महाभानुस्तेजसा चाभयङ्करः ।
सहस्ररश्मिदीप्तश्च ह्यादित्यः प्रीयतां मम ॥ २६॥

इति सूर्यस्तुतिः समाप्ता ।

Proofread by PSA Easwaran

*sUryastutiH*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*